# वैयाकरणसिद्धान्तकौमुदी

## हल्सन्धिप्रकरणम् (७)

# पुनरावर्तनम्

- रुत्वप्रकरणम्
  - समः सुटि
  - पुमः खय्यम्परे
  - नश्छव्यप्रशान्
  - नॄन् पे
  - कानाम्रेडिते

# १४२. 'कुप्वोः ॅक ॅपौ च' (८.३.३७)

- पदत्रयम् । कुप्वोः, ॅक ॅपौ, च ।
- 'विसर्जनीयस्य सः' इत्यतः 'विसर्जनीयस्य' इति अनुवर्तते ।
- विसर्जनीयस्य – षष्ठी = विसर्गस्य स्थाने
- कुप्वोः – सप्तमी = कवर्गे पवर्गे च परे
- ॅक ॅपौ – प्रथमा = जिह्वामूलीय-उपध्मानीयौ भवतः
- च = विसर्गः च
- कवर्गे पवर्गे च परे विसर्जनीयस्य क्रमात् जिह्वामूलीय-उपध्मानीयौ स्तः । चाद्विसर्गः ।

येन नाप्राप्तन्यायेन 'विसर्जनीयस्य सः' इत्यस्य अपवादोऽयम् । न तु 'शर्परे विसर्जनीयः' इत्यस्य ।

- विसर्जनीयस्य सः (८.३.३४) – खरि परे विसर्जनीयस्य सकारादेशः स्यात्
- रामः त्रायते = रामस्त्रायते ।
- शर्परे विसर्जनीयः (८.३.३५) – शर्परे खरि विसर्जनीयस्य विसर्जनीय एव स्यात् ।
- कः त्सरुः = कः त्सरुः ।
- वा शरि (८.३.३६) – शरि परे विसर्जनीयस्य विसर्जनीय एव स्याद् वा ।
- रामः शेते = रामः शेते / रामस् शेते
- कुप्वो ᳲक ᳲपौ च (८.३.३७) – कवर्गे पवर्गे च परे विसर्जनीयस्य जिह्वामूलीय-उपध्मानीयौ स्तः, विसर्गश्च ।
- रामः कः = रामᳲकः / रामः कः

- वासः क्षौमम् = ???
- विसर्जनीयस्य सः इत्यनेन सत्वम् ?
- शर्परे विसर्जनीयः इत्यनेन विसर्गः?
- कुप्वो ∩क∩पौ च इत्यनेन जिह्वामूलीयः?

- ’येन नाप्राप्ते यो विधिः आरभ्यते स तस्य बाधको भवति’ ।
- उदा: अचि परे सर्वत्र ’आद्गुणः’ इति गुणस्य अवश्यप्राप्तौ ’वृद्धिरेचि’ इति वृद्धिः आरभ्यते । तस्माद् वृद्धिः गुणस्य बाधिका ।

- अत्रापि खरि परे सर्वत्र ’विसर्जनीयस्य सः’ इति सत्वस्य अवश्यप्राप्तौ ’कुप्वोः..’ इति जिह्वामूलीय आरभ्यते । तस्माज्जिह्वामूलीयः सत्वस्य बाधकः ।

- किन्तु कुप्वोः परयोः सर्वत्र 'शर्परे विसर्जनीयः' इत्यस्य प्राप्तिः नास्ति । 'कः त्सरुः' इत्यत्र जिह्वामूलीयस्य प्राप्तिः नास्ति, 'रामः कः' इत्यत्र विसर्जनीयस्य प्राप्तिः नास्ति । तस्मादनयोः बाध्य-बाधकभावो नास्ति । उभयोः प्राप्तौ जिह्वामूलीयस्य असिद्धत्वात् 'शर्परे विसर्जनीयः' इत्येव प्रवर्तते ।
- तेन वासः क्षौमम् इत्यादौ विसर्ग एव ।
- वासः + क्षौमम् = वासः क्षौमम् ।

- नॄन् + पाहि
- नॄर् पाहि
- नॄँर् पाहि (अत्रानुनासिकः...) / नॄंर् पाहि (अनुनासिकात्...)
- नॄँ◌ः पाहि (खरवसानयोः...) नॄं◌ः पाहि
- १. नॄँ∩पाहि (कुप्वो ∩क∩पौ च) २. नॄं∩पाहि
- ३. नॄँ◌ः पाहि (कुप्वो ∩क∩पौ च) ४. नॄं◌ः पाहि
- रुत्वाभावे,
- ५. नॄन् पाहि

# १४५. संहितायाम् (६.१.७२)

- इत्यधिकृत्य ।

# १४६. छे च (६.१.७३)

- पदद्वयम् ।
- 'ह्रस्वस्य पिति कृति तुक्'(६.१.७१) इत्यतः 'ह्रस्वस्य' इति, 'तुक्' इति च अनुवर्तते ।
- ह्रस्वस्य – षष्ठी = ह्रस्वस्वरस्य
- छे – सप्तमी = छकारे परे
- तुक् – प्रथमा = तुगागमः स्यात्
- संहितायाम्
- ह्रस्वस्य छे परे तुगागमः स्यात् संहितायाम् ।

- स्व + छाया
- स्वत् छाया ('छे च' – ६.१.७३)
- स्वद्  छाया ('झलां जशोऽन्ते – ८.२.३९)
- स्वज्  छाया ('स्तोः श्चुना श्चुः' – ८.४.४०)
- स्वच्  छाया ('खरि च' – ८.४.५५)
- स्वच्छाया
- श्चुत्वस्य असिद्धत्वात् जश्त्वेन दः । ततः चर्त्वस्य असिद्धत्वात् पूर्वं श्चुत्वेन जः । तस्य चर्त्वेन चः ।
- श्चुत्वस्य असिद्धत्वात् 'चोः कुः' (८.२.३०) इति कुत्वं न ।
- शिव+छाया = शिवच्छाया ।

# १४७. आङ्माङोश्च (६.१.७४)

- 'संहितायाम्' इति अधिक्रियते ।
- 'ह्रस्वस्य पिति कृति तुक्'(६.१.७१) इत्यतः 'तुक्' इति, 'छे च' इत्यतः 'छे' इति च अनुवर्तते ।
- आङ्माङोः – षष्ठी = आङ् इत्युपसर्गस्य, माङ् इत्यव्ययस्य च
- छे – सप्तमी = छकारे परे
- तुक् – प्रथमा = तुगागमः स्यात्
- संहितायाम्
- एतयोः छे परे तुक् स्यात् ।

- ’पदान्ताद्वा’ इति विकल्पापवादः ।
- आ + छादयति = आच्छादयति ।
- मा + छिदत् = माच्छिदत् ।

# १४८. दीर्घात् (६.१.७५)

- ’संहितायाम्’ इति अधिक्रियते ।
- ’ह्रस्वस्य पिति कृति तुक्’(६.१.७१) इत्यतः ’तुक्’ इति, ’छे च’ इत्यतः ’छे’ इति च अनुवर्तते ।
- दीर्घात् छे परे तुक् स्यात् ।
- दीर्घस्यायं तुक्, न तु छस्य ।
- ’विभाषा सेनासुराच्छायाशालानिशानाम्’ इति ज्ञापकात् ।

- सुरा + छाया
- यदि छकारस्य तुगागमः स्यात्,
- सुरा छ् त् आया (पदान्ताद्वा – ६.१.७६)
- सुरा छ् च् आया (स्तोः श्चुना श्चुः – ८.४.४०)
- सुरा च् च् आया (खरि च – ८.४.५५)
- 'सुराच्चाया' इति स्यात्, छकारस्य श्रवणं न स्यात् ।

- दीर्घस्य तुगागमे तु,
- सुरात् छाया
- सुराद् छाया ('झलां जशोऽन्ते' – ८.२.३९)
- सुराज् छाया ('स्तोः श्चुना श्चुः' – ८.४.४०)
- सुराच् छाया ('खरि च' – ८.४.५५)
- सुराच्छाया

- चे + छिद्यते = चेच्छिद्यते ।

# १४९. पदान्ताद्वा (६.१.७६)

- 'संहितायाम्' इति अधिक्रियते ।
- 'ह्रस्वस्य पिति कृति तुक्'(६.१.७१) इत्यतः 'तुक्' इति, 'छे च' इत्यतः 'छे' इति, 'दीर्घात्' इत्यतः 'दीर्घात्' इति च अनुवर्तते ।
- दीर्घात् पदान्तात् छे परे तुग् वा स्यात् ।
- लक्ष्मी + छाया = लक्ष्मीच्छाया / लक्ष्मीछाया ।

# पुनरावर्तनम्

- वृद्धिरादैच् (१.१.१) – संज्ञा ।
  आदैच्च वृद्धिसंज्ञं स्यात् । आ, ऐ, औ ।
  वृद्धिरेचि ।
- अदेङ् गुणः (१.१.२) – संज्ञा ।
  अदेङ् च गुणसंज्ञं स्यात् । अ, ए, ओ ।
  आद्गुणः ।
- इको गुणवृद्धी (१.१.३) – परिभाषा ।
  गुणवृद्धिशब्दाभ्यां यत्र गुणवृद्धी विधीयेते तत्र 'इकः' इति षष्ठ्यन्तं पदम् उपतिष्ठते ।
  मिदेर्गुणः । मृजेर्वृद्धिः ।

- हलोऽनन्तराः संयोगः (१.१.७) – संज्ञा ।

    अज्भिः अव्यवहिता हलः संयोगसंज्ञाः स्युः ।

    संयोगे गुरु ।

  संयोगान्तस्य लोपः ।

- मुखनासिकावचनोऽनुनासिकः (१.१.८) – संज्ञा ।

    मुखसहितनासिकया उच्चार्यमाणः वर्णः अनुनासिकसंज्ञः स्यात् ।

    उपदेशेऽजनुनासिक इत् ।

    यरोऽनुनासिकेऽनुनासिको वा ।

- उपदेशेऽजनुनासिक इत् (१.३.२) – संज्ञा ।

  उपदेशे अनुनासिकः अच् इत्संज्ञः स्यात् ।

- हलन्त्यम् (१.३.३) – संज्ञा ।

  उपदेशे अन्त्यं हल् इत् स्यात् ।

  आदिरन्त्येन सहेता ।

- आदिरन्त्येन सहेता (१.१.७१) – संज्ञा / परिभाषा?

  अन्त्येन इता सहितः आदिः मध्यगानां स्वस्य च संज्ञा स्यात् ।

  इको यणचि ।

- तुल्यास्यप्रयत्नं सवर्णम् (१.१.९)
- नाज्झलौ (१.१.१०)
- ऋलृवर्णयोः मिथः सावर्ण्यं वाच्यम्
- अणुदित्सवर्णस्य चाप्रत्ययः (१.१.६९)

- ईदूदेद्द्विवचनं प्रगृह्यम् (१.१.११)
- अदसो मात् (१.१.१२)
- शे (१.१.१३)
- निपात एकाजनाङ् (१.१.१४)
- ओत् (१.१.१५)
- सम्बुद्धौ शाकल्यस्येतावनार्षे (१.१.१६)
- उञः (१.१.१७)
- ऊँ (१.१.१८)
- ईदूतौ च सप्तम्यर्थे (१.१.१९)

- न वेति विभाषा (१.१.४४)

- आद्यन्तौ टकितौ (१.१.४६)
- मिदचोऽन्त्यात्परः (१.१.४७)

- षष्ठी स्थानेयोगा (१.१.४९)
- स्थानेऽन्तरतमः (१.१.५०)
- यत्रानेकविधमान्तर्यं तत्र स्थानत आन्तर्यं बलीयः

- उरण् रपरः